गूढार्थतत्त्वदीपिका అను వ్యాఖ్యా సహితే
పంచపాదికావిచారః

श्रीगणपतये नमः । कर्पूराङ्कुरधवलं वै वल्लभी शान कीर्तिनिबुद्ध । वेदावदितरहस्यं सकलैनमस्य नमस्यामः ॥१॥ अ
नुमानपरिच्छेद गूढार्थान्तिसदीपिका । धीराणामुपकाराय रघुदेवेन तन्यते ॥२॥ अथ संगत्यभिधानं उपमानप्रत
पित्तत्व शंका स्यादिति संगति प्रदर्शयन्नशिष्यावधानाय प्रतिजानीते । प्रत्यक्षोपजीवकत्वादिति । अत्र प्र
त्यक्षोपजीवकत्वादित्यस्य प्रत्यक्षप्रमित्युपजीवकत्वात् प्रत्यक्षप्रमाणोपजीवकत्वाच्चेत्यर्थः । प्रत्यक्षानन्तरं ता
प्रत्यस्य प्रत्यक्षप्रमितिनिरूपणानन्तरं प्रत्यक्षप्रमाणनिरूपणानन्तरं चेत्यर्थः । प्रत्यक्षपदस्य उभयत्रैव प्रयो
गात् । अनुमानमित्यस्य तु भावल्युटा अनुमितिः । करणल्युटा अनुमानप्रमाणं चार्थः । एवमुपमाने
सत्राऽपि ज्ञेयं । तथाच प्रत्यक्षप्रमित्युपजीवकत्वात् । प्रत्यक्षप्रमितिनिरूपणानन्तरं बड्वादिसंमतत्वाद्
पमितेः प्रागनुमितिर्निरूप्यते । प्रत्यक्षप्रमाणोपजीवकत्वात् । प्रत्यक्षप्रमाणनिरूपणानन्तरं बड्वादि
संमतत्वादुपमानात्प्रागनुमानप्रमाप्रमाणे निरूप्यते इति समुदितार्थः । अतो भयत्र संगत्य
प्रदर्शनेन ग्रंथकारस्य न्यूनतापत्तिरिति । अत्र प्रसंग उपोद्घात हेतुतावसरस्तथा । निर्वाहकैककार्यत्वे
षोढा संगतिरिष्यते इत्युक्तेन परिगणितानां षड्विधसंगतीनां मध्ये तः पातिनि उपजीवकत्वस्य न संगति
त्वमिति नाशंकनीयं । हेतुतापदस्य उपजीवकत्वस्य पदार्थकार्यत्वकारणत्वं चेत्यर्थकत्वादाधिकत्वात्तु ता
॥१

२

मान्यथादिनाविनुसंधेयं। बहुवादिसंमतत्वादित्यादिना उपमाननिरूपणानंतरमेवानुमानं कथं न निरूपितमिति
शंकानिरासः। बहुवादिसंमतत्वमेव प्रथमं निरूपणे इत्यस्यैव संगिको वादेति। प्रकारान्तरं तु दीधितावनुसंधे
यं। तत्रेत्यादि। अत्र घटकत्वं सप्तम्यर्थः। कर्तव्ये निरूपणे कानुमानलक्षणघटकोऽनुमितिरितिसमुदितार्थ
थार्थः। तथा च विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया घटकीभूतार्थज्ञानं विना विशिष्टार्थज्ञानासंभ
वात् विशेषणज्ञानार्थमनुमितिः प्रथमं निरूपितेति तत्त्वं। अत्र व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति ज्ञाना
नः कर्मधारयः। व्याप्तिविशिष्टपदं व्याप्तिप्रकारकपरं। पक्षधर्मत्वं पक्षवृत्तित्वं। तथा च व्याप्तिप्रकारकपक्षवृ
त्तित्वविषयकज्ञानमनुमितिस्त्यनुमितिलक्षणं पर्यवसन्नं। पर्वतो वह्निमानित्याद्यनुमितौ व्याप्तिप्रकार
पक्षधर्मताज्ञानात्मकवह्निव्याप्यधूमः पर्वत इति ज्ञानजन्यतयालक्षणसमन्वयः। न च विशिष्टवैशिष्ट्य
बुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुतया वह्निव्याप्यधूमवान् पर्वत इत्यादिज्ञानजन्यवह्नि
व्याप्यधूमवत्पर्वतवानयं देश इत्यादिविशिष्टवैशिष्ट्यबोधात्मकशाब्दबोधप्रत्यक्षादावतिव्याप्तिरिति वा
च्यं। व्याप्यप्रकारकपक्षविशेष्यकनिर्णयत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयीभूतभावत्वाव
च्छिन्नविषयताकत्वशून्यज्ञानस्य प्रकृते विवक्षितत्वादुपदर्शितविशिष्टवैशिष्ट्यावगाहिशाब्दबोधादि

व्याप्तिघटकीभूताऽभावविषयकत्वतयाऽनुपपत्तेरभावात्। अत्र वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञानजन्य
पर्वतज्ञानजन्यलौकिकप्रत्यक्षेऽपि नायकत्वे ज्ञानजन्ये पर्वतो वह्निमानित्युपनीतभाने चातिव्याप्तिवार
णाय तथाविधनिर्णयजन्यत्वमपहाय तथाविधनिर्णयत्वावच्छिन्नजनकतानिरूपितजन्यतया निवेशः।
तथा च तत्र नातिव्याप्तिः। तादृशज्ञानलौकिकप्रत्यक्षं प्रति तादृशज्ञानस्य विषयत्वेन तथाविधोपनीतभा
नं प्रति तथाविधज्ञानस्य वह्न्यादिज्ञानत्वेनैव हेतुतया तथाविधनिर्णयत्वेन तत्र हेतुताया अभावात्।
न चैवं सति वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्याद्यनुमितावव्याप्तिः। तत्र व्याप्तिघटकत्वेनाभावस्य भाने
नाभावविषयत्वाकत्वस्य स्पष्टत्वोपादर्शितलक्षणविरहादिति वाच्यं। तथाविधजनकतानिरूपि
ताभावाविषयकत्वे इति जन्यता अपरत्वस्यानुभवत्वव्याप्यजातिमत्त्वस्य विवक्षिततया तथाविधजन्यताश्र
य पर्वतो वह्निमानित्याद्यनुमितिव्यक्तितादृशानुमितित्वात्मकजातिमादाय सर्वत्र लक्षणसमन्वयात्
अनुभवत्वव्याप्यत्वं चात्रानुभवनिष्ठभेदप्रतियोगितावच्छेदकं अतो नानुभवत्वस्याभेदेनानुभवत्व
व्याप्यतया तदादाय प्रत्यक्षादावतिव्याप्तिः। अत एव साधनसमानाधिकरणाभावप्रतियोगितावच्छेद
कसाध्यकतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यरूपव्याप्तिसाधनभेदेनाभिन्नतया ऐक्याभाव

नात्र विशेष्यधूमनिष्ठवह्निनिरूपितव्याप्तिर्वा निवेशनीयः। पर्वतत्वादिना पक्षतापि निवेशनीयः। सर्वसाधारण
लक्षणस्यैकस्याभावात्। तथा च पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिर्णयि
त्वावच्छिन्नकारणतानिरूपिताभावत्वावच्छिन्नविषयकत्वशून्यवृत्तिकार्यताश्रयज्ञानत्वमनुमितित्वमनु
मितिचलक्षणं पर्यवसन्नं। एवं च घटानुमितावव्याप्तिरित्यपि परास्तं। जातिघटितलक्षणाकरणे नोपदर्शितरि
त्या सर्वत्रानुमितित्वजातिमादाय लक्षणाभावादापत्तेर्लक्षणगमनसंभवादिति। नचैवं सति अनुमितित्वमेवानु
मितिलक्षणमस्तु किमितरांशनिवेशनेनेति वाच्यं। अनुमितित्वस्वरूपेण ज्ञातेरनिवेशेन प्रकृते यथा निवेशेन
वैयर्थ्याभावादिति। नचैवमपि धूमापादकवह्न्यापादकपर्वतो वह्निमान्स्यादित्यापादने अतिव्याप्तिः। आ
पत्तौ आपाद्यव्याप्यापादकवत्ताज्ञानस्य हेतुत्वात् घटकत्वाभावे पत्तेर्वह्निव्याप्यधूमवान्पर्वत इति ज्ञानजन्यत्वेन
निरुक्तलक्षणस्यात्रासत्त्वादिति वाच्यं। आपत्तेर्मानसज्ञानविशेषतया तत्र व्याप्यादिभानसंभवेनाभाव
त्वावच्छिन्नविषयतावच्छून्यत्वघटितलक्षणस्यात्रासत्त्वे नातिव्याप्तिविरहात्। इत्यलं बहुतरजल्पनेन।
तत्करणमिति। निरुक्तानुमितिकरणमित्यर्थः। अनुमानमिति। अनुमानपदवाच्यमित्यर्थः। अतो न ल
क्षणलक्ष्यतावच्छेदकयोरभेदापत्तिः। अनुमानस्य लक्षणस्वरूपमाह। तच्चेति। च स्त्वर्थे तथा चानुमानस्य

रूपं चेत्यर्थः। लिंगपरामर्शो। लिंगविशेष्यकव्याप्तिज्ञानं यथा कृतव्याप्यप्रकारकपक्षविशेष्यकज्ञानात्मकरूपपरा
मर्शस्य व्यापारत्वया व्यापारवत्कारणात्मकरणत्वाभावेनानुमितिकरणत्वाभावादनुमानस्वरूपत्वानुपपत्तेः। वक्ष्य
ते इति। परामर्शोऽग्रे वक्ष्यत इत्यर्थः। एतेन ज्ञायमानलिंगकरणतावादिमते नित्यस्य लिंगस्याप्यनुमानतया अनुमा
नत्वावच्छेदेन प्रत्यक्षोपजीवकत्वाभावेन तस्य आनंतर्याभिधानानियामकत्वात्कथं प्रत्यक्षोपजीवकत्वा
दित्यादिग्रंथेन तथोक्तिरित्याशंका निरस्तेति। अनुमानस्य लक्षणं अनुमानस्वरूपं च उक्तप्रसंगात्। तत्प्रामाण्यं
व्यवस्थापयितुं प्रथमं चार्वाकमतमुत्थापयति। अथेत्यादि। अनुमानं धूमादिविशेष्यकज्ञानं एतेनानुमिति
करणत्वरूपानुमानत्वस्य पक्षतावच्छेदकत्वे परमते आश्रयासिद्धिरिति परास्तं। धूमादिज्ञानत्वस्य प्रकृतपक्षता
वच्छेदकत्वात्। न प्रमाणं। प्रमितिकरणं भिन्नं। अत्र प्रमाणतावच्छेदकरूपशून्यत्वादिति हेतुः पूरणीयः। नन्वत्र
हेतुरसिद्धः। प्रमाणतावच्छेदकव्याप्तिप्रकारकधूमादिविशेष्यकनिर्णयत्वस्य धूमादिविशेष्यकव्याप्तिज्ञाने
सत्त्वादित्यत आह। अयोग्योपाधिनाभित्यादि। योग्यानुपलब्ध्या। यद्यपि हेतुर्योग्योपाधिमान् स्यात्तदा यो
ग्योपाधिमत्तया उपलभ्येत व्याप्तिविषयो भूतयोग्योपाध्युप[illegible]भावेन। प्रतियोगिसत्त्वप्रसंजितो
पलंभप्रतियोगिकाभावस्य योग्यानुपलब्धिपदार्थत्वादत्र तथोक्तिरिति ध्येयं। व्यभिचारसंशयात्।

सर्वत्रव्यभिचारसंशयसंभवादुपाधिसंशयस्य व्याप्यसंशयस्य व्याप्यसंशयविधया व्यभिचारसंशयहेतुत्वादि
ति भावः। ननूपाधिसंशयाद्व्यभिचारसंशयो न संभवति तत्र प्रतिबंधकीभूतसाध्यसाधनसहचारज्ञानस्य सत्त्वा
दित्यत आह। शतशः सहचारितयेत्यादि। शतशः सहचरितयोः पार्थिवत्वलोहलेख्यत्वयोः हीरके व्यभिचार
ज्ञानसत्त्वादित्यर्थः। तथा च व्यभिचाराज्ञानानुपपत्त्या निरुक्तसहचारज्ञानप्रतिबंधकत्वं न संभवतीति भावः। न
नु अनुमानप्रमाणानंगीकारे धूमादिज्ञानानंतरं वह्निज्ञानासंभवेन तदुत्तरं पर्वतो वह्निमानिति शब्दप्रयोगरूपव्य
वहारानुपपत्तिः। व्यवहारं प्रति व्यवहर्तव्यज्ञानस्य हेतुत्वादित्यत आह। लोक इत्यादि। लोके इत्यस्य व्यवहार इ
त्यत्रान्वयः। चस्त्वर्थः। तथा च धूमज्ञानानंतरं लोके वह्निव्यवहारस्त्वित्यर्थः। संभवनामात्रादिति। धर्मधर्म्य
संसर्गाग्रहविशिष्टपर्वतज्ञानकालीनवह्निज्ञानादित्यर्थः। प्रकृते वह्न्यंशे स्मरणात्मकतादृशज्ञानस्यैव संभ
वनापदार्थत्वादिति। मात्रपदेनात्र ज्ञानान्तरव्यवच्छेदः। ननु चार्वाकमते वह्न्यादिर्द्विविधः। पारमार्थिकोऽपा
रमार्थिकश्च। तत्र पारमार्थिकवह्निर्निर्विकल्पकज्ञानविषयः। अपारमार्थिकवह्निः सविकल्पकज्ञान
विषयः। तस्य पारमार्थिकवह्निविषयकत्वे तत्र वह्निज्ञानानुपपत्तिः। तन्मते वह्नित्वादेर्वह्निभेदादिरूपा
दतद्व्यावृत्त्यात्मकरूपस्याभावतया तन्मते सिद्धांतीकात्मकस्य पारमार्थिकवह्न्यादौ संबंधाभावात्।
सदसतोः संबंधानंगीकारात्। एवं चोपदर्शितस्मरणात्मकवह्न्यादिव्यवहारांगीकारे तादृशव्यवहारजनकज्ञा

न सर्वसिद्धस्याप्रामाण्यानुभवस्यानुपपत्तिः। स्मरणात्मकज्ञानादेः सप्रकारतया अलीकविषये प्रामाण्या-
भावात्। ननु तत्र आलीकविषयकज्ञानस्य भ्रमत्वानियमादित्यत आह। संवादेनेत्यादि। संवादेन निर्विक-
ल्पकसविकल्पकविषयकरूपसंवादात्मकदोषेण प्रामाण्याभिमानात्। तथाविधव्यवहारजनकत्वाद्धि ज्ञाने प्रा-
माण्यभ्रमात्। तथा च तत्र भ्रमात्मकज्ञाने नैवतादृशानुभवस्य निर्वाह इति भावः। उपसंहारस्तीति। अन-
यादिशा अनुमानस्याप्रामाण्ये तदधीनशक्तिग्रहस्य योग्यतोपमितिशाब्दज्ञानजनकयोरुपमानशब्द-
योः सुतरामप्रामाण्यं प्रत्यक्षातिरिक्तं न प्रमाणमित्यर्थः। नन्वत्रोपक्रमोपसंहारविरोधः। अनुमानत्वा-
वच्छिन्ने अप्रामाण्यसाधनस्योपक्रान्ततया न तद्धर्मावच्छिन्ने एवतस्योपसंहरणीयत्वौचित्यात्। उपक्रमोप-
संहारयोः समानप्रकारकनियमादिति चेन्न। यत्तो नाप्रत्यक्षं प्रमाणमिति अनुमानं न प्रमाणमित्यस्य
नोपसंहारः। अपि चिदमप्रिय तिज्ञातिरपीति। अथवानाप्रत्यक्षं प्रमाणमित्युपसंहारानुरोधेन अ-
नुमानं न प्रमाणमित्युपक्रमोपि नाप्रत्यक्षं प्रमाणमित्येतत्परतया व्याख्येयः। अनुमानशब्दस्य
प्रत्यक्षात् अनुयत् मानं प्रमाणमिति व्युत्पत्त्या न तथाविधार्थसंभवादिति ननु अनुमानस्याप्रामाण्यं
प्रमाणतावच्छेदकरूपशून्यत्वहेतुना साध्यते उत अनुमानं न प्रमाणमिति शब्देन वा तत्राद्ये आह। अ

प्रामाण्यमिति साधर्म्यस्यादि। अप्रामाण्यसाधर्म्येण अप्रमाणतावच्छेदकरूपशून्यत्वेनेति यावत्। यथाश्रोत्रचक्षु
रादौ व्यभिचारात्। दृष्टसाधर्म्यस्य ज्ञायमानप्रामाण्यसाधर्म्यस्य ज्ञायमानप्रमाणतावच्छेदकरूपशून्यस्ये
ति यावत्। अनुमानत्वात्। अनुमानप्रमाणत्वादिदं तु ज्ञायमानहेतोरनुमानत्वमङ्गीकुर्वतामाचार्याणां
मतमवलम्ब्योक्तं। चिन्तामणिकारमते तु तथाविधशब्दज्ञानमेवानुमानप्रमाणमित्यवधेयं। अंस्ये आहि[illegible]
एतद्वाक्यस्येत्यादि। एतद्वाक्यस्य अनुमानं न प्रामाण्यमिति वाक्यस्य। संदिग्धादिपूर्वमन्यतरप्रति अ
नुमानप्रमाणनिर्वाहितसंदेहविशिष्टपुरुषं प्रति अनुमानप्रमाणमिति अप्रामाण्यविपर्ययप्रामाण्यप्रकारक
ज्ञानविशिष्टं प्रति चेत्यर्थः। अर्थवत्त्वात्। तादृशपुरुषं प्रति तथाविधसंदेहनाशतथाविधविपर्ययनाशयोः प्रयो
जकत्वेन तदुभयप्रयोजनवत्त्वात्। तयोः। तथाविधसंदेहतथाविपर्ययज्ञानयोः। अप्रत्यक्षत्वादेः। तादृशप्रयो
गकर्तुरप्रत्यक्षत्वादित्यभावः। अनुमानस्याप्रामाण्यं तथाविधशब्दोऽस्तीत्येव न संभवति। तथा हि परकीय
स्य तथाविधसंदेहविपर्ययज्ञानान्यतरस्य तादृशप्रयोगस्य कर्तुः प्रत्यक्षासंभवेनाज्ञाततया तज्ज्ञानेनाश
रूपफलज्ञानासंभवः। अभावबुद्धिं प्रति प्रतियोगिज्ञानस्य हेतुत्वात्। तथा चेष्टसाधनताज्ञानाभावेन
तत्साधनज्ञानस्याप्यसंभवात्। तादृशो शब्दानुकूलकण्ठताल्वाद्यभिघातप्रयत्नाभाव इति तादृशशब्दा
नुकूलकण्ठताल्वाद्यभिघाताभावात्। जनकाभावेन तादृशशब्द एव न संभवति। कुतस्तस्मादनुमाने

अप्रामाण्यं साधनीयमिति। ननु तथा विधेष्टप्राप्तये गिपरकीयसंशयादेर्ज्ञानि निरूक्तसंभवे नात्मकमेव
तत्र भविष्यतीति निर्णीतानुपपत्तिरित्यतो दोषान्तरमाह। एतद्वाक्यप्रत्ययादि अनुमानेन प्रामाण्यमिति वाक्यस्य
प्रामाण्ये अप्रामाण्ये च प्रत्यक्षापेतिरिक्तस्याप्रामाण्यव्याघातादित्यर्थः। एतद्वाक्यप्रामाण्ये साक्षादेव प्र
त्यक्षातिरिक्तस्यैतद्वाक्यस्य प्रामाण्यमागतं। अप्रामाण्ये च व्यञ्जनकलक्षणाप्रामाण्यघटकीभूततया प्रत्य
क्षविषयतापाधीनतया अनुमानेऽप्रामाण्याभाविरूपतत्त्वापि विषयबाधस्यावश्यंभूपेयत्वात्प्रत्य
क्षातिरिक्तस्यानुमानस्याप्रामाण्यं दुष्परिहरमिति भावः। ननु मानं न प्रमाणमिति वाक्यस्याप्रामाण्ये
पदर्शितरीत्याऽनुमानस्याप्रामाण्यावश्यकत्वेऽपि कथमशुद्धिः। यतोऽप्रामाण्यजनकत्वमप्रामाण्यं नवदामः।
अपि तु प्रमाकरणव्यतिरेकमेवेति नानुपपत्तिरतो दूषणान्तरमाह। अपि चेति। प्रत्यक्षस्य। प्रत्यक्षात्म
कज्ञानस्येत्यर्थः। अप्रामाण्यापत्तेः। प्रामाण्यासिद्धिप्रसंगात्। तस्यानुमेयत्वात्। तत्प्रामाण्यस्य अ
नुमानप्रामाण्याधीनत्वात्। तथा चानुमानाप्रामाण्ये प्रत्यक्षाप्रामाण्यासिद्ध्या प्रत्यक्षमपि प्रमाणं
न स्यादिति भावः। ननु प्रत्यक्षात्मकज्ञानस्य प्रामाण्यं स्वेनैव गृह्यत इति अनुमानाप्रामाण्येन प्रत्यक्ष
प्रामाण्यासिद्धिप्रसंगः। तत्प्रामाण्यप्रत्यक्षस्येव प्रमाण्यात् आह। स्वत इति। प्रामाण्यग्रह इति

प्रत्यक्षस्यैव प्रामाण्यस्य स्वेनैव ग्रहादित्यर्थः। निश्चितेसंशयायोगादिति भावः। वस्तुतस्तु। वह्निव्याप्यधूम
वान्पर्वतइज्ञानानन्तरोत्पन्नवह्निज्ञानत्वदुत्तरवं भाविनाहमनुमिनोमी त्यनुभवानुमितित्वरूपंजातिविशेष
वस्यकत्वयातदवच्छिन्नं प्रतिव्याप्तिज्ञानस्य करणत्वंसर्वसंप्रवाच्यं। अन्यथाज्ञानमात्रस्यासाधारणकारण
जन्यत्वानुपपत्तेः। तथाचव्याप्तिज्ञानत्वेनैतस्यानुमानप्रमाणस्याभावस्यकाभिति। अधिकंअनुमितिमानस
विचारे अनुसंधेयं। ननुव्याप्तिनिर्णयस्यानुमानप्रामाण्यंसपवर नसंभवतिसर्वत्रोहरीत्याव्यभिचा
रसंशयेनतत्प्रतिबंधादत आह। व्याप्तिग्रहोपायश्चेति। वक्ष्यते। व्याप्तिनिरूपणानंतरंप्रतिपादयि
ष्यते। व्याप्तेर्दुर्वचत्वे वक्ष्यमाणे सत्यां तद्ग्रहोपायस्यापि दुर्वचत्वमित्याशंकांपरिजिहीर्षुः प्रथमंव्याप्तिंनिरूपयि
तुमाह। ननन्वीत्यादि। अनुमितिहेतुत्वस्यादि व्याप्तिज्ञानेः अनुमितिकरणव्याप्तिज्ञाने व्याप्तिनिश्चयप्रशान
यावत्। तस्यैवानुमानप्रमाणत्वेनप्रकृतेनोपस्थितत्वात्। अत्राविजयत्वंसप्तम्यर्थः। संगतिश्चात्रानुमितिल
क्षणेनसह प्रकृतत्वादिरूपाप्रसिद्धा इति। तद्विशति। हियस्मात्दव्यभिचरितत्वंनेतिसर्वस्मिन्नलक्षणेसंनव्यप्य
ते। तथाचयस्माद्व्यभिचरितत्वंनसाध्याभाववद्वृत्तित्वमित्यादिरूपंकेवलान्वयिन्यभावात्। अतोव्य
ऽभिचरितत्वस्य दुर्वचतयानव्याप्तिरूपमित्यन्वयबोधः। अतोनात्रनकारद्वयवैयर्थ्यमापन्निः। साध्याभा

ववदवृत्तित्वमित्यत्र अन्यथाभावगर्भत्ववीहिः। तथाहि। वृत्तेरभावोऽवृत्तिः साध्याभाववति अवृत्तिर्यस्य साध्या
भाववदवृत्तिः तस्य भावः साध्याभाववदवृत्तित्वं। वह्निमान् धूमादित्यादौ साध्याभाववति जलह्रदे हेतोरवृत्तेर्या प्ति
लक्षणसमन्वयः। धूमवान्वह्नेरित्यादौ धूमाभाववति अयोगोलके वह्नेर्वृत्तित्वान्नातिव्याप्तिः। नच धूमा
भाववति अयोगोलके वह्नेर्वृत्तित्वेऽपि धूमाभाववति जलह्रदे तस्यावृत्तितया अतिव्याप्तिर्दुर्वारेति वाच्यं। सा
ध्याभाववदवृत्तित्वमित्यत्र साध्याभाववद्वृत्तित्वावच्छिन्नसामान्याभावस्य विवक्षणात्। वृत्तिश्च हेतुता
वच्छेदकसंबंधेन ग्राह्या। अतो वह्निमान् धूमादित्यादौ वह्न्यभाववति जलह्रदे कालिकसंबंधेन धूमस्य वृत्ता
वपि न क्षतिः। साध्याभावः साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताको
ग्राह्यः। अतो वह्निमान् धूमादित्यादौ समवायादिसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावादिकमादाय
दोषः। साध्याभाववत्त्वं दैशिकविशेषणतासंबंधेन बोध्यं। एवंच कालिकसंबंधेन वह्न्याद्यभाववति पर्व
तादौ धूमादेर्वृत्तावपि न क्षतिः। नचैवं सति घटत्वाभाववान् पटत्वादित्यादावव्याप्तिः। अत्र घ
टत्वाभावाभावस्य घटत्वाभावीयस्वदैशिकविशेषणताविशेषणसंबंधेनाधिकरणतया अप्रसि राम
द्धेरिति वाच्यं। अभावाभावस्यातिरिक्तस्यांगीकारात्। साध्याभाववत्तायाः साध्यवत्तायाश्च विरोधितानि ॥५॥

यामकसंबंधेनाविवक्षणाद्वा। अत एव कालिकसंबंधावच्छिन्नप्रतियोगिताकाभावाभाववान्नाशत्वाद्
इत्यादौ नातिव्याप्तिः। अन्यथा तथाविधसाध्याभावस्याकाशाभावस्याधिकरणे आत्मादौ आत्मत्व
स्य वृत्तित्वेनाव्याप्तेः। नन्वेवं सत्तावान् जातेरित्यादावव्याप्तिः। साध्याभाववति सामान्यादौ हेतु
तावच्छेदकसंबंधेन वृत्तेरप्रसिद्धेरिति वाच्यं। स्वाधिकरणवृत्तिसाध्याभाववृत्तिकत्वाभावस्य विवक्षणात्।
स्वपदमत्र हेतुपरं। अत एव न वह्निमान् गगनादित्यादौ अतिव्याप्तिरिति ध्येयं। नन्वेवमपि कपिसंयोगी
एतद्वृक्षत्वादित्यादावव्याप्तिः। कपिसंयोगाभावस्याव्याप्यवृत्तितया हेत्वधिकरणे सत्त्वादित्यतोऽधि
करणभेदेनाव्याप्यवृत्तिप्रतियोगिकाभावभेदवादिमतेन लक्षणमाह। साध्यवद्भिन्नेति। अत्र सा
ध्यवद्भिन्ने साध्याभाव इति सप्तमीतत्पुरुषाश्रयणात् साध्यवद्भिन्नवृत्ति साध्याभाववदवृत्तित्वमिति
वाक्यार्थः। वह्निमान् धूमादित्यादौ वह्निमद्भिन्नवृत्तियो वह्न्यभावस्तद्वति जलह्रदादौ धूमस्यावर्तमानत्वेन
लक्षणसमन्वयः। कपिसंयोगी एतद्वृक्षत्वादित्यादौ कपिसंयोगवद्भिन्ने गुणादौ यो वर्त्तते यः कपि
संयोगाभावस्तद्वान् गुणादिरेव न तु लक्षणकर्तृमते अधिकरणभेदेनाव्याप्यवृत्तिप्रतियोगिकाभाव
भेदात् तथा चैतद्वृक्षत्वादेस्तदवृत्तितया लक्षणसमन्वयः। अत्र साध्याभावानुपादाने वह्निमान् धूमा

दित्यादौ वह्निमद्भिन्नजलह्रदवृत्तिघटत्वाभावाधिकरणपर्वतादौ धूमादेर्वृत्तितयावह्निमान्धूमादित्यादावसं
भवस्य दुष्परिहरत्वात्। अतएव न साध्यनिवेशस्यापि वैयर्थ्यं। नचाधिकरणभेदेनाभावभेदवादिमते
ह्रदादिवृत्तिघटत्वाद्यभावस्यापि पर्वतवृत्तिघटत्वाद्यभावाद्भिन्नतया नोपदर्शितरीत्या साध्याभाववदादिवि
शेषणव्यर्थतासंभव इति वाच्यं। एतल्लक्षणकर्तृमते व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासे
नाव्याप्यवृत्तिप्रतियोगिताकाभावस्यैव अधिकरणभेदेन भेदाभ्युपगमादन्यस्य सर्वपूर्ववादिनि। ननु अत्र
घटत्वघटाकाशसंयोगान्यतराभाववान् गगनत्वादित्यादौ अव्याप्तिः। तथाविधसाध्यवद्भिन्नघटवृत्ति
तेयः साध्याभावो घटाकाशसंयोगाभावः स्यादिति आकाशे गगनत्वसम्बद्धत्वात्। नचायमसंबद्ध एवेति वाच्यं।
घटानधिकरणदेशावच्छेदेन गगने घटाकाशसंयोगाभावस्य विद्यमानतया तत्तथाविधान्यतराभावस
त्त्वादेवेति चेन्न। अभावाभावस्यातिरिक्तत्वेन तद्दोषाभावात्। तथाहि। तथाविधान्यतराभावाभा
वस्य तथाविधान्यतराभाववत्तिविद्यमानतया अव्याप्यवृत्तिप्रतियोगिकत्वेनाधिकरणभेदेन भेदा
न्याच्च तथाविधसाध्यवद्भिन्नघटवृत्तितया ताहृशान्यतराभावाभावस्य गगने असत्त्वेन तत्र नाव्या
प्तेरिति। लाघवाल्लक्षणान्तरमाह। साध्यवत्प्रतियोगिकान्योन्याभावस्यादि। यत्तु अधिकरणभेदे

ग

राम

॥७॥

न्नाभावादेर्मानाभावात्कपिसंयोगीएतद्वृक्षत्वादित्यादावव्याप्तिः।कपिसंयोगवद्भिन्नेगुणादौवर्त्तमानःक-
पिसंयोगाभावस्यैतद्वृक्षेऽपिविद्यमानत्वादित्यतोलक्षणान्तरमाह।साध्यवत्प्रतियोगिकेत्यादी-
ति।तदसत्।एतल्लक्षणेऽपितत्राव्याप्तिसत्त्वात्तादृशाभाववत्तारूपीकार्याअसंगतेरिति।नचैतल्लक्षणेनाना-
धिकरणकसाध्यकसद्धेतौवह्निमान्धूमादित्यादावव्याप्तिः।अन्यत्वादिपर्वतप्रतियोगिकभेदवतिमहानसादौ
धूमादेर्विद्यमानत्वादित्यतोलक्षणान्तरमाह।सकलेत्यादि।वह्निमान्धूमादौसकलसाध्याभाववति
जलह्रदादौवर्त्ततेयोधूमाभावस्तत्प्रतियोगित्वस्यधूमेसत्त्वाल्लक्षणसमन्वयः।नचात्रधूमवान्वह्नेरित्या-
दावतिव्याप्तिः।सकलधूमाभाववतिजलह्रदेवर्त्ततेयोवन्ह्यभावस्तत्प्रतियोगित्वस्यवह्नौसत्त्वादितिवाच्यम्।
साकल्यस्यसाध्याभाववत्स्वपिविशेषणीयत्वात्।तथाचनतत्रातिव्याप्तिः।सकलसाध्याभावव~~त्~~
सकलान्तःपातिनिअयोगोलकवन्ह्यभावस्याप्रतीततयातत्रलक्षणगमनासंभवात्।नचैवंसत्यपि
वह्निमान्धूमादित्यादावव्याप्तिः।सकलसाध्याभाववत्प्रतियोगिकघटत्वान्योन्याभाववत्सक-
लान्तःपातिनिपर्वतादौधूमाभावासत्त्वादितिवाच्यम्।सकलसाध्याभावपदेनसाध्यतावच्छेदका-
वच्छिन्नप्रतियोगिताकाभावस्यविवक्षणात्।नचैवंसतिकपिसंयोगीएतद्वृक्षत्वादित्यादौअ-

व्याप्तिरिति वाच्यं। साध्याभावप्रतियोगिवैय्यधिकरण्यस्य विशेषणात्। प्रतियोगिवैय्यधिकरणस्य मात्रस्य प्रतियो
गितावच्छेदकावच्छिन्नानधिकरणवृत्तित्व। न चासिद्धान्तलक्षणोक्तरीत्या प्रतियोगिवैय्यधिकरण्यविकल्पापत्तिः।
याद्दृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तिसाध्यनिष्ठ तादृशप्रतियोगिताकाभावावस्य साध्याभा
वातेनाविवक्षणात्। अत्र प्रतियोगितावच्छेदकावच्छिन्नत्व निवेशान्न गुणकर्मान्यत्व विशिष्टसत्तावान् जाते
रित्यादौ नातिव्याप्तिः। अत्रानिरुक्तप्रतियोगिवैय्यधिकरण्यविशिष्टस्य साध्याभावीयो निवक्षणीयं। अन्यथा
गुणादिकमन्तर्भाव्य निरुक्तप्रतियोगिवैय्यधिकरण्याश्रयसंयोगाभावस्य वृक्षसत्वे न कपिसंयोगी एतद्वृ
क्षत्वादित्यादावव्याप्तेः। नन्वेवमपि घटः कपिसंयोगादित्यादावव्याप्तिः। घटत्वादावव्यतिरिक्षादौ कपि
संयोगाभावस्य विद्यमानत्वादिति वाच्यं। हेत्वभावेपि प्रतियोगिवैय्यधिकरण्यानिवेशात्। अत्र प्रति
तियोगिवैय्यधिकरण्य हेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं। अतो न द्रव्यं गुणकर्मान्यत्वेसतिस
त्वादित्यादावव्याप्तिः। न चासिद्धान्तलक्षणरीत्या प्रतियोगिवैय्यधिकरण्यविकल्पापत्तिः हेत्वधिकरण
त्वमात्र हेतुतावच्छेदकसंबंधेन बोध्य। अतो वह्निमान् धूमादित्यादौ सकलसाध्याभाववति जलह्रदादौ
संबंधसामान्येन यद्धर्मानधिकरणत्व वृत्तित्वविशिष्टधूमाभावस्यासत्वेपि न क्षतिः। एतेन द्रव्यं सत्वादित्या

दौ द्रव्यत्वाभाववद्वृत्तिगुणकर्मान्यत्वविशिष्टसत्ताभावप्रतियोगिकत्वस्य सत्त्वायां सत्त्वेनातिव्याप्तिरिति हे
तुतावच्छेदकावच्छिन्नप्रतियोगितायां निवेशनीयमिति परास्तं । तत्र विशिष्टसत्ताभावस्य सत्तात्वरूपहेतुता
वच्छेदकावच्छिन्नानधिकरणत्वेऽपि तत्स्वरूपनिरूपकप्रतियोगिवैयधिकरण्यविशिष्टद्रव्यत्वाभाव-सकलोऽव्या
प्तिनिरूपणादौ च सत्त्वे न लक्षणघटकतया तत्त्वमादायातिव्याप्तेरसंभवादिति । इतोऽपि लघुलक्षणान्तरमाह ।
साध्यवदन्येति । यत्तु । अत्र निर्धूमत्वस्य व्याप्यवान्निर्वह्निरित्यादिस्थलादावव्याप्तिः । तथाविधसाध्याभाववति
पर्वतादौ वह्न्यभावरूपहेत्वभावस्यैकस्यापि वह्नेरसत्त्वात्तत्साध्यवदन्यस्यवत्तारणीकांप्रयच्छंति । तदस्तु
द्धं । तत्र वह्न्यभावरूपहेतोरन्योन्याभावमादायैव लक्षणगमनसंभवात् । सकलसाध्याभाववद्वृत्त्यभा
वस्यात्र अस्यान्तान्योन्याभावसाधारणाभावत्वरूपेणाभावनिवेशनादिति । अत्र साध्यवदन्यस्येत्यनेन सा
ध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदो बोध्यते । अन्यादिपदसमभिव्याहारस्थले अन्वयितावच्छेदकावच्छि
न्नप्रतियोगिताकान्योन्याभाववत्त्वबोधनियमात्तथैव अन्यादिपदसमभिव्याहारज्ञानस्य तत्रैव हेतुत्वा
कल्पनात् । अन्यथा अन्यादिप्रतिप्रतियोगिकान्योन्याभावत्वमात्रबोधे नीलो घटो घटादन्य इति वाक्य
स्य योग्यतापत्तेः । एवं च साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववदवृत्तित्वं व्याप्तिरिति पर्यवसितलक्ष

णवाक्यार्थः। अतो न वह्निमान् धूमादित्यादौ महानसीयधूमे वह्निमद्भेदमादायाव्याप्तिः। न चैवं सत्यपि
तत्राव्याप्तिः। महानसीयवह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदस्यापि साध्यवत्त्वावच्छिन्नप्रतियोगिताकभे
दतया लक्षणघटकत्वादिति वाच्यं। साध्यतावच्छेदकानवच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदकतानिरू
पितप्रतियोगिताकान्योन्याभावस्यैव प्रकृते लक्षणे निवेशादिति। लक्षणपंचकमेव दूषयति। केवलान्व
यिन्यभावादिति। इदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वरूपसाध्याभावाप्रसिद्ध्या अव्याप्तेरित्यर्थः। प्रका
रान्तरेण व्याप्तिलक्षणमात्रमेव दूषयति। नापीति। साध्यासामानाधिकरण्यानधिकरणत्वमात्रं न सा
ध्याधिकरणवृत्तित्वासामानाधिकरण्यं। द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। अपि तु असामानाधिकरण्यानधिक
रणत्वं साध्यानधिकरणवृत्तित्वसामानाधिकरण्यत्वं पदस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्ति
त्वेन लाक्षणिकतया साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभाववत्त्वमर्थः। द्वितीयाधिकरणत्वस्य
वैयर्थ्यमनुपादानाच्च वृत्तित्वमत्र हेतुतावच्छेदकसंबंधो नावश्यं निवेशनीयं। अन्यथा कालिकादि
संबंधमादाय वह्निमान् धूमादित्यादौ दोषापत्तेः। तथा च सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः। सत्ताभाववति
सामान्यादौ समवायेन वृत्तेरप्रसिद्धेरिति भावः। तदा स्वरूपसंबंधावच्छिन्नतथात्व घटितत्वाभावि

राम

विशिष्टायाः विशिष्टायाहेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतायात न्निरूपकतावच्छेदकत्वसमेवत्वसंबोध्यं
लक्षणांतरमाह। साध्यवैयधिकरण्येत्यादि। अत्र साध्यानधिकरणवृत्तित्वमर्थः। द्वितीयाधिकरणास्यवैयर्थ्य
नानिवेशात्। नचसाध्यवदन्यावृत्तित्वाभिधानेनपौनरुक्त्यापत्तिरितिवाच्यं। अत्र तथाविधवृत्तिभिन्नत्वस्य
निवेशेनवृत्तित्वस्यतावत्प्रतीतत्वेपि नलक्षणेनपौनरुक्त्याभावादिति। एतल्लक्षणद्वयमेकोतमप्राप्तिरूपदूषय
ति। तद्युक्तमपीति। साध्याधिकरणानधिकरणाभिन्नस्यसाध्यनिष्ठाधेयत्वानिरूपकाधिकरणानिरूपकं
तद्वृत्तित्वाभावाविशिष्टहेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छेदकहेतुतावच्छेदकत्वसाध्यान
धिकरणवृत्तिभिन्नत्वंचार्थः। प्रकृतेतथैवतात्पर्यकल्पनादिति। तच्चेति। तादृशलक्षणद्वयं चेत्यर्थः। नत्वेति।
केवलान्वयिसाध्यकहेतावित्यर्थः। साध्यनिष्ठाधेयत्वानिरूपकत्वावच्छिन्नाप्रसिद्ध्या साध्याधिकरणत्वाव
च्छिन्नभेदाप्रसिद्ध्या चेतिशेषः। नानाव्यापकसाध्यकेव्याप्तिमाह। यत्किंचिदित्यादि। यत्किंचित्साध्या
निष्ठाधेयत्वानिरूपकाधिकरणे यत्किंचित्साध्याधिकरणेच पर्वतादौ वर्तमाने धूमे अप्रसिद्धमित्यर्थः।
तथाच साध्यनिष्ठाधेयत्वानिरूपकाप्रसिद्ध्या साध्यानधिकरणाप्रसिद्ध्या केवलान्वयिसाध्यकेहेतौ वह्नि
साध्यकधूमादिहेतौ च तादृशलक्षणद्वयमव्याप्तिरितिभावः। अप्रसिद्धमित्यस्यपूर्वोक्तकेवलान्वयिसा
ध्यकहेतावित्यत्रापि अन्वयो बोध्य इति। साध्याभाववदवृत्तित्वमितिव्याप्तिलक्षणे केवलान्वयिसाध्यक

हेतावव्याप्तिमुद्धर्तुमाशंकते। अथेति। समवायित्वेनावाच्यत्वाभावो घटएवस्यादि। एवकारोप्यर्थे। तथाचसम
वायित्वेनावाच्यत्वाभावो घटेपिप्रसिद्ध इत्यर्थः। समवायित्वेनवाच्यत्वं नास्तीतिप्रतीतिसिद्धव्यधिकरणधर्मा
वच्छिन्नप्रतियोगिताकवाच्यत्वाभावं केवलान्वयिनमादाय तत्रलक्षणसमन्वय इति भावः। वाच्यत्वंतु अस्मा
दादयमर्थो बोध्य इति ईश्वरेच्छाविषयत्वं। अतिरिक्तसामान्यविशेषो वा अतो नानुपपत्तिरिति ध्येयं। अथ
साध्याभाववद्वृत्तित्वमित्यत्र साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावोऽवश्यं निवेशनीयः। अन्यथाव
ह्निमान्धूमादित्यादौ महानसीयवह्न्याद्यभावमादायाव्याप्तेः। तथाचिदंवाच्यंज्ञेयत्वादित्यादौ कथंसमवायि
त्वावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावमादायलक्षणसमन्वयः। तादृशाभावस्यवाच्यत्वत्वरूपसा
ध्यतावच्छेदकावच्छिन्नवाच्यत्वनिष्ठप्रतियोगिताकाभावमादायलक्षणसमन्वयः। तादृशाभावस्यवा
च्यत्वत्वस्यसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकभिन्नत्वेनलक्षणाघटकत्वादिति। अत्रकेचित्। साध्या
भाववद्वृत्तित्वमितिलक्षणेसाध्यप्रतियोगिकाभावएवलक्षणेनिविष्ट इतिभ्रमेणाशंकते। अपरेत्वा
हुः। वस्तुतस्तु। तत्रमहानसीयवह्न्यभावादिकमादायाव्याप्तिवारणार्थंसाध्यतावच्छेदकावच्छिन्नप्रतियोगि
ताकाभावोननिवेश्यते केवलान्वयिन्यव्याप्तिप्रसंगात्। अपितुसाध्यतावच्छेदकावच्छिन्नाधिकरणत्व

तत्तद्व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकयावदभावविशिष्टसाध्याभाव एव निवेश्यते तथा च नाव्या
प्तिः । उपदर्शिताभावमादाय लक्षणगमनसंभवादित्यभिप्रायेण शंकते । अथेत्यादित्येव मनोरमं । न
नु तथापि तत्र केवलान्वयिसाध्यके व्याप्तिर्दुर्वारा हेतौ तथाविधव्यधिकरणधर्मावच्छिन्नप्रतियोगिताका
भावविरहाद्घटादौ हेतोर्वृत्तेरित्यत्राह । यावन्तः साध्यतावच्छेदकावच्छिन्नाधिकरणवृत्तिव्यधिकरणधर्मा
वच्छिन्नप्रतियोगिताकोभयाभावविशिष्टाऽभावाः प्रत्येकं तत्तत्सजातीयाभावेन तत्साध्याभाववद्वृत्ति
त्वाभावास्तद्वृत्तेस्तस्यैव प्रकृतव्याप्तिलक्षणत्वेन विवक्षितत्वादिति । साजात्यं चात्र समानासमानाधिकर
णधर्मावच्छिन्नप्रतियोगिताकान्यतररूपेण बोध्यं । तथा च तत्र नाव्याप्तिः । तादृशव्यधिकरणधर्माव
च्छिन्नसाध्याभावसजातीयव्यधिकरणधर्मावच्छिन्नवृत्तित्वाभावमादायैव तत्र लक्षणगमनसंभवा
दिति । न चैवमित्यादि । एवं च तत्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिकसाध्याभावमादाय साध्याभा
ववत्प्रसिद्ध्यंगीकारे घटत्वघटमत्त्वाद्याव्याप्यव्यभिचारः । साध्याभाववद्वृत्तित्वरूपव्यभिचारसत्त्वात् तथा
च केवलान्वयिसाध्यकहेतोर्व्यभिचारित्वेन लक्षणसंगमनार्थमुपदर्शितप्रकारावलंबनं निरर्थकमे
वेति भावः । न चैवमित्याशंकां निराकरोति । साध्यतावच्छेदकावच्छिन्नेत्यादि । तादृशः साध्यतावच्छे

तं

दी

दकावच्छिन्नप्रतियोगिताकः । तर्हीति । साध्यतावच्छेदकावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वस्य
व्यभिचारपदार्थत्वमित्यर्थः । तादृशसाध्याभावेति । साध्यतावच्छेदकावच्छिन्नसाध्याभाववदित्यर्थः । अव्यभि
चारित्वस्यैव व्याप्तिपदार्थत्वात् इति भावः । अप्रसिद्धिरिति । केवलान्वयिनि साध्ये कृते तादृशसाध्याभावा
प्रसिद्ध्या तादृशलक्षणाप्रसिद्धिरित्यर्थः । तथा च केवलान्वयिसाध्यके अव्याप्तिर्दुरुद्धरैवेति भावः । न च
व्यभिचारित्वं व्याप्तिरित्युक्तं ॥ तच्च न योगिकं अपि तु पारिभाषिकं तच्च यावन्तः साध्यतावच्छेदकावच्छिन्ना
धिकरणानीति च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वाभावविशिष्टाभावाः प्रत्येकं तत्तत्सजा
तीयइत्यादिना दर्शितमिव स्यादत आह । प्रतियोग्यप्रसिद्धेश्चेति । न प्रतियोगितावच्छेदक इति मानाभावादि
ति शेषः । तथा च मानाभावाद्व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या व्यधिकरणधर्मा
वच्छिन्नप्रतियोगिताकाभावमादाय केवलान्वयिसाध्यके हेतावुपदर्शितलक्षणागमनासंभवेन त
त्र तादृशलक्षणाव्याप्तिर्दुष्परिहरैवेति । ननु प्रमाणाभावाद्व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका
भावो नाङ्गीक्रियते इत्यत्र रूपमप्युक्तं । घटत्वेन पटो नास्तीति प्रत्यक्षसंभवेन प्रत्यक्षसंभवनत्र प्रमाणा
त्वादित्यत आह । तद्विशिष्टेति । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्येत्यर्थः । अभावधीति । राम

अभावलौकिकप्रत्यक्षस्येत्यर्थः। तथाच प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनोऽप्रसिद्ध्या भ्रमात्मकसंभ
वेन व्यभिचारप्रयुक्तधर्मावच्छिन्नप्रत्यक्षानुपपत्त्या न तत्र प्रत्यक्षप्रमाणाभिमतभावः। ननु अभावलौकिक
प्रत्यक्षं प्रति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिकज्ञानं न हेतुः। अपि तु प्रतियोगितावच्छेदकप्रतियोग्यु
भयविषयकज्ञानमात्रं तत्र हेतुः तथाच न व्यभिचारप्रधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षानुप
पत्तिः। तत्र घटपटादिनिसमूहालम्बनस्यैव तादृशस्य संभवादित्यत आह। अन्यथेति। तथाविधोभय
विषयकज्ञानस्य तत्र हेतुत्वेत्यर्थः। निर्विकल्पकादपीति। घटत्वपटोभयविषयकनिर्विकल्पादपीत्यर्थः।
नन्वेवं सति गविशशशृंगं नास्तीत्याकारकस्य शशीयत्वावच्छिन्नस्य शृंगनिष्ठप्रतियोगिताकाभा
वविषयकप्रत्यक्षस्यासिद्धिरित्यत आह। गविशशशृंगं नास्तीत्यादि। शशीयत्वे गो। निष्ठशृंगाभाव
प्रतियोगितावच्छेदकत्वप्रत्यक्षासिद्धिरित्यर्थः। अतो न सिद्ध्यसिद्धिव्याघातप्रसंगः। ननु तथापि शश
शृंगं नास्तीति प्रतीतिबलादेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावसिद्धिरित्यत आह। शश
शृंगं नास्तीति चेति। शशशृंगं नास्तीति प्रत्यक्षस्येत्यर्थः। शशशृंगाभाव इति। विषय इति शेषः। तथाच
तादृशप्रत्यक्षस्य शशीयशृंगत्वावच्छिन्नप्रतियोगिता[illegible]काभावविषयकत्वेनैवोपपत्तौ न व्यधिकरण

धर्मावच्छिन्नप्रतियोगिताकाभावसाधकत्वमिति भावः। ननु अभावलौकिकप्रत्यक्षं प्रति प्रतियोगितावच्छे
दकविशिष्टप्रतियोगिज्ञानं हेतुः। तथा सति द्रव्यत्वादिना घटादिज्ञाने घटत्वेन निर्विकल्पकादिनापि
घटो नास्तीति प्रत्यक्षापत्तेः। तेषामपि विशेष्यतो घटत्वावच्छिन्नविषयकत्वात्। अपि तु प्रतियोगितावच्छेद
कप्रकारकप्रतियोगिविषयकज्ञानं हेतुः। तच्च घटत्वप्रकारकपटविशेष्यकभ्रमात्। घटत्वेन
पटो नास्तीत्याकारकप्रत्यक्षोपपत्तौ बाधकाभावेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्र
त्यक्षप्रमाणमव्याहतमेवेति चेन्न। यतो व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानभ्युपग
मे व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावविषयलौकिकप्रत्यक्षं प्रति प्रतियोगितावच्छेदकप्रका
रकस्य हेतुत्वमेव न कल्प्यते कुतः प्रतियोगितावच्छेदकप्रकारकत्वविधया ज्ञानबलेन घटत्वेन पटो नास्ती
त्याकारकप्रत्यक्षोत्पत्तिरिति तादृशप्रत्यक्षासिद्ध्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावोऽप्र
सिद्ध एव। यदि च घटत्वेन पटो नास्तीत्यभावप्रत्यक्षं प्रसिद्धं तथापि तद्भ्रमात्मकमेव। अन्यथा [illegible] तथा
विधाभावतत्प्रतियोगितावच्छेदकत्वकल्पने गौरवादित्यादिद्युत्यादिकं स्वयमूहनीयं। प्रकारान्तरेण व्याप्तिल
क्षणमाशङ्क्य निराकरोति। अथेत्यादिना साध्यासमानाधिकरणेत्यादि साध्यासामानाधिकरण्येति च।

(तथाच साध्याधिकरणावृत्तित्वाभावकत्व) अनधिकरणत्वं अभावत्वं अधिकरणता तया निवेशप्रयोजना
भावात् । विशेषणताविशेषसंबंधेन तद्वत्ता । न्यायसाधिकरणत्वं । तथाच साध्याधिकरणावृत्तित्वाभा
ववत्त्वं व्याप्तिरिति साध्यासमानाधिकरण्येति लक्षणवाक्यार्थः । केवलान्वयिसाध्यके साध्यासामाना
धिकरण्याप्रसिध्याऽव्याप्तिः । तदप्रसिध्यापरिहरति । साध्यासमानाधिकरणत्वादि । साध्यासमाना
धिकरणत्वं साध्याधिकरणावृत्तित्वं । साध्यासमानाधिकरणत्वपदार्थविकल्पेन लक्षणं दूषयति । सा
ध्यासमानाधिकरणत्वं हीति । साध्यानधिकरणाधिकरणत्वं साध्यानधिकरणमेव । धिकरणं यस्य
तत्त्वं साध्यानधिकरणवृत्तित्वाभावमिति यावत् । साध्याधिकरणानधिकरणत्वं साध्याधिकरणं वानधिक
रणं यस्य तत्त्वं साध्याधिकरणावृत्तित्वाभावमिति यावत् । आद्यं दूषयति । केवलान्वयिनीति । साध्यानधिक
रणाप्रसिद्धेरिति शेषः । द्वितीयं दूषयति । यत्किंचित्साध्यानधिकरणानधिकरणधूमे सत्त्वादि । महानसी
यवन्ह्याद्यधिकरणावृत्तिपर्वतीयमादावित्यर्थः । अप्रसिद्धेरिति । साध्यानधिकरणवृत्तित्वाप्रसिद्ध्या
साध्याधिकरणवृत्तित्वाभावाप्रसिद्ध्याचेत्यर्थः । अत्र यथासंख्यं केवलान्वयिनीत्यादावन्वयः । तथा
च साध्यानधिकरणावृत्तित्वघटितलक्षणं केवलान्वयिसाध्यकेऽव्याप्तिः । साध्याधिकरणावृत्तित्वघटि

तल्लक्षणं तु वह्निमान् धूमादित्यादावव्यापकसाध्यके अव्याप्तिरिति तदुभयान्यतरघटितलक्षणमशुद्धमि
ति भावः। इदमुपलक्षणं। साध्याधिकरणावृत्तित्वघटितलक्षणे द्रव्यं सत्त्वादित्यादावुक्तव्याप्तिरपि द
ष्टव्या। नापि स्वेत्यादिना। अत्र स्वपदं हेतुतावच्छेदकावच्छिन्नहेतुपरं। तथा च यद्धर्मावच्छिन्नसमा
नाधिकरणात्यन्ताभावाप्रतियोगियद्धर्मावच्छिन्न तद्धर्मावच्छिन्नसामानाधिकरण्यं तद्धर्मावच्छिन्ननिष्ठ
व्याप्तिरिति लक्षणनिष्कर्षो बोध्यः। पर्वतीयवह्नित्वावच्छिन्नपर्वतीयवह्नेः महानसीयधूमस्य धूमत्वा
वच्छिन्न महानसीयधूमस्य तथा च वह्निमान् धूमादित्यादावव्याप्तिरिति भावः। ननु यद्धर्मावच्छिन्ना
धिकरणावृत्त्यत्यन्ताभावाप्रतियोगितानवच्छेदकयत्साध्यतावच्छेदकतदवच्छिन्नसामानाधिकरण्य
व्याप्तिरिति वाच्यं। अत एवानुपदाकृतिस्थले अव्याप्तिः। धूमवत्त्वे वह्निनीति। धूमनीयावह्नित्वस्य
धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वादित्यत आह संयोगी द्रव्यत्वादित्यादावव्या
प्तेरिति साध्यकस्य हेतुव्याप्यत्वमाह। द्रव्यत्वादेरित्यादि। अव्याप्यवृत्तीति। संयोगादीत्यर्थः। प्रतियो
गिव्यधिकरणमिति। प्रतियोग्यधिकरणवृत्तित्वमिति सर्थः। अव्याप्यवृत्त्याभावेति। अवच्छिन्नवृत्तिकान्यस्यापि

ऽप्यर्थः। अभावविशेषणं। हेतुसामानाधिकरण्याभावविशेषणं। तथाच संयोगी द्रव्यत्वादित्यादौ संयोगाभावस्य प्र
तियोग्यधिकरणस्य वृत्तित्वात् अवच्छिन्नवृत्तिकृत्तयाच लक्षणघटकत्वेन नाव्याप्तिरिति भावः। नैकान्तिकत्वा
भावप्रसंगात्। व्यभिचारित्वाभावप्रसंगात्। अव्याप्तेश्च प्रसंगादित्यावत्। उपदर्शितरीत्या संयोगाभाव
स्य लक्षणघटकतया संयोगी सत्वादित्यादावतिव्याप्तिरिति भावः। नन्वधिकरणभेदेन अभावभेदवादिमते गुणादौ
द्रव्यवृत्तिगुणो संयोगाभावभिन्नप्रकृत संयोगाभावः। तथाच संयोगी सत्वादित्यादौ नातिव्याप्तिः। अत्र गुणवृ
त्तिसंयोगाभावस्यापि प्रतियोग्यधिकरणवृत्तितया लक्षणघटकत्वमादाय दूषणमाह। नहीत्यादि। प्रतियोगिवि
रोधिप्रतियोग्यधिकरणवृत्तिः अपरः द्रव्यवृत्तिसंयोगाभावभिन्नः। अभावभेदाभावादिति। प्रमाणाभावा
दिति। शेषः। नच व्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिरूपविरुद्धधर्माध्यासात्तयोर्भेद आवश्यक इति वाच्यं। य
तः संयोगाभावादेरवच्छिन्नवृत्तिकत्वावच्छिन्नवृत्तिकान्यत्वनिरूपविरुद्धधर्मद्वयमंगीक्रियते येन तदध्यासस
त्त्वभेदोऽभ्युपेयः। अपितु गुणादौ वृत्तिर्यस्याभावस्य प्रतियोगिमत्त्वरूपाव्याप्यवृत्तित्वं द्रव्यवृत्त्यभाव
प्रतियोगिमत्त्वरूपाव्याप्यवृत्तित्वं च तत्राभ्युपेयते। तदुभयं च न विरुद्धं गुणाद्यधिकरणत्वादौ तयोः सत्त्वात् इ
त्यादिकमन्यत्र स्वयमूह्यं। अत्यन्ताभावघटितलक्षणे दूषयित्वा अन्योन्याभावघटितलक्षणमपि दूषय

यति। नापि साध्यवदित्यादि। साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवान्यस्य साधनस्य तत्त्वमित्य
र्थः। तदन्योन्याभावस्यापि। संयोगवदन्योन्याभावस्यापि। तत्र कपिसंयोगवानिति। तथा च कपिसंयोगी एतद्वृ
क्ष इत्यादिस्थले व्याप्तिरिति भावः। एवं। कपिसंयोगवानिति कपिसंयोगवद्भेदस्वीकारे भेदसाहित्याभेदाभावः। एक
त्र प्रसज्यत इति दोषः। संयोगवद्भेदवति संयोगवद्भेदाभावरूपसंयोगस्यापि विद्यमानत्वादिति भावः। ननु शिखी वि
नष्ट इत्यत्र शिखाध्वंसप्रतीतेर्विषयः। तथाग्रे वृक्षः कपिसंयोगी मूले नेति प्रतीतिरपि संयोगात्यन्ताभाव एव वि
षयो न तु तथा चान्योन्याभावस्याव्यवहितः प्रमाणाभाव इति चेन्न। यतो बाधकप्रतीति सत्त्व एव प्रतीतिर्विशेष
णाभावो विषयः सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाध इति न्यायात्। तथा च।
शिखानष्टापुरुषो नष्ट इति बाधकप्रतीतिसत्त्वात्। शिखी विनष्ट इत्यादौ अत्र शिखाध्वंस एव प्रतीतिविषयः।
अग्रे वृक्षः कपिसंयोगी मूले नेति प्रतीतिस्तु विशेषणात्यन्ताभावविषयकत्वकल्पने युक्तेन परस्यामः। बाध
काभावप्रतीत्यसत्त्वादिति कपिसंयोगिवद्भेद एव तद्धीविषयको वाच्यः। अत एव नञ्पदेत्यादि। घटित यादृशवाक्यात्
यद्धर्मावच्छिन्नविषयेण संसर्गेण यद्धर्मावच्छिन्नो बोध्यते नञ्पदघटिततादृशवाक्यात् तद्धर्मावच्छिन्नतद्धर्मावच्छि
न्नाभावो बोध्यत इत्यर्थः। काप्रतियोग्यभावान्यपबोधो तुल्ययोगक्षेमाविति व्युत्पत्तिरपि संगच्छत इति भ

न्यथानियिपदासमभिव्याहारात्कपिसंयोगी वृक्ष इति वाक्यवृक्षे तादात्म्यसंबंधेन कपिसंयोगवत् प्रकारक
बोधः। मूले वृक्षः कपिसंयोगी नेति वाक्यात् कपिसंयोगाभावप्रकारकबोध इति साध्य,घाति विरुध्यते इति।
तथा च तादृशप्रतीतिकपिसंयोगवदन्योन्याभावविषयकत्वावच्छेदकत्वे अन्योन्याभावस्याव्याप्यवृत्तित्
मावच्छेदकमित्यादि दीधितौ बहुतरमनुसंधेयं। अन्योन्याभावस्याव्याप्यवृत्तित्वानभ्युपगमेपि दोष
माह। साधनतानिष्ठेत्यादि। व्याप्यव्यापकभावो व्याप्तिरूपा व्यापके निरूपकतासंबंधेन भावः नि
रूपकतासंबंधेन साध्यनिष्ठव्याप्तेति यावत्। तद निरूपणात् उक्तप्रकारातिरिक्तरूपेणापि तन्निरूपणा
संभवात्। तथा च प्रकृतव्याप्तिलक्षणस्य प्रकृतव्याप्तिघटकत्वेनात्माश्रय इति भावः। ननु व्याप्यत्वेन
यच्छपर्थः। अपितु सामानाधिकरण्यं तथा च। नात्माश्रय इत्यतो दोषान्तरमाह। साध्यसाधनयोरि
ति। भावप्रधानो निर्देशः। द्वंद्वः। तेनाच साध्यत्वसाधनत्वयोरित्यर्थः। व्याप्तिनिरूपकत्वात्। व्या
प्तिघटितत्वाच्च। व्याप्तिनिरूपकत्वं साध्यत्वव्याप्यत्वं च साधनत्वमिति भावः। ननु पक्षसमाना
धिकरणान्योन्याभावाप्रतियोगिवृत्तित्वसामानाधिकरण्यं न निष्ठा व्याप्तिरिति। साधनसाध्य
चेत् नियतत्वघटितमेव लक्षणं वाच्यमतो नात्माश्रयानुपपत्तिरित्यत आह। वह्निमानित्यादि। तथा

चवह्निमान्धूमादित्यादावव्याप्तिरितिभावः।ननुसाध्यसमानाधिकरणान्योन्याभावप्रतियोगिताव
च्छेदकप्रतियोगिकतानवच्छेदकंयत्साध्यतावच्छेदकंतदवच्छिन्नसामानाधिकरण्यंव्याप्तिरित्येवलक्षणं
परिष्करणीयं।अत्रचवह्निमान्धूमादित्यादौनाव्याप्तिः।धूमवान्वह्निमान्नेतिप्रतीत्यावह्नित्वस्य
तथाविधप्रतियोगितानवच्छेदकत्वादित्यतआह।विशेषाभावकूटेत्यादि।विशेषाभावकूटदेव
नतद्वह्नित्वावच्छिन्नवद्भेदकूटदेवअभावव्यवहारोपपत्तौनवह्निमानित्यादिप्रतीत्युपपत्तौसा
मान्याभाववह्नित्वरूपसामान्यधर्मावच्छिन्नप्रतियोगिताभावःतथाचविशेषावच्छेदस्यैवसाध्यान्य
धर्मावच्छिन्नप्रतियोगितावच्छेदकताकत्वेवह्नित्वस्यधूमाधिकरणवृत्तितद्वह्निमद्भेदप्रतियो
गितावच्छेदकत्वानुपपत्तेरिति [illegible] लक्षणेवह्निमान्धूमादित्यादावव्याप्तिरितिभावः।लक्षणा
न्तरंदूषयति।नापिसाधनसमानाधिकरणयावद्धर्मेत्यादि।अत्रसाधनसमानाधिकरणायावन्तो
धर्मास्तन्निरूपितवैयधिकरण्यानधिकरणंयत्साध्यंतत्सामानाधिकरण्यंव्याप्तिरिति
लक्षणवाक्यार्थः।वह्निमान्धूमादित्यादौतथाविधयावद्धर्मान्तःपातिपर्वतत्वमादायानस्यादि

वैय्याधिकरण्यानाधिकरणत्वस्य वह्न्यादौ सत्त्वाल्लक्षणसमन्वयः। धूमवान्वह्नेरित्यादौ तथाविधयावद्धर्मा
नः पातिपर्वतत्वमहानसत्वादिस्वपयोगोलकवैय्यधिकरण्यस्य धूमे सत्त्वान्नातिव्याप्तिः। नन्वत्र वैय्य
धिकरण्यं तदनधिकरणवृत्तित्वं तथा च वह्निमान्धूमादित्यादौ लक्षणाव्याप्तिः। तथाविधयावद्धर्माणामप
वृत्तित्व न च सत्त्वादीनामेकाधिकरणाप्रसिद्धेः। न च प्रमेक तथाविधयावद्धर्माणां यदधिकरणं तत्तद्भिन्न
वृत्तित्वमिसत्स्य विवक्षणादोष इति वाच्यं। तथा सति द्रव्यं पृथिवीत्वादित्यादौ अव्याप्तेः। तथाविधया
वद्धर्माणां पातिघटत्वपटत्वाद्यनधिकरणकुड्यादिवृत्तित्वात् द्रव्यत्वस्येति। तथा से विधयावद्धर्मान नच
मात्र धिकरणवृत्तित्वं विवक्षणीयमिति वाच्यं रूपवान्पृथिवीत्वादित्यादावव्याप्तिः। घटीयरूपे पृथिवीत्वसमाना
नाधिकरण्यपटत्वानधिकरणमात्रवृत्तित्वे पटीयरूपे पृथिवीत्वसामानाधिकरणमात्रवृत्तित्वमस्तीति सर्वत्र तथा
विधयावद्धर्मानधिकरणमात्रवृत्तित्वस्य सत्त्वात्। इति चेन्न। अपि तथाविधयावद्धर्मानधिकरणमात्रवृत्तित्वानव
च्छेदकं यत्साध्यतावच्छेदकं तद्वाच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः। अवच्छेदकत्वं मात्रानतिरिक्तवृत्तित्वं
धूमत्वादौ तथाविधस्य स्वरूपसंबंधेन रूपावच्छेदकत्वसमानाभावान्न धूमवान्वह्नेरित्यादावव्याप्तिः। तच्च तद
८ भावेवृत्तित्वं। तथा च स्वरूपवान्पृथिवीत्वादित्यादौ नाव्याप्तिः। तथाविधत्वे पटत्वानाधिकरणमात्रवृत्तिश्चा

भाववत्तिघटपटरूपादेः रूपसत्त्वविततथा निरुक्ततथाविधावच्छेदकत्वशून्यत्वात् । यत्तु अत्रावच्छेदकत्वं अनतिरिक्तवृ
त्तित्वं तच्च तच्छून्यधर्मावृत्तित्वं धर्मत्वं वृत्तित्वं । अत्र वृत्तिमत्त्वरूपधर्मस्यानिवेशे द्रव्यवान् मेयत्वादित्यादौ अतिव्याप्तिः
तथाविधयावद्धर्मेति निर्गुणत्वानधिकरणमात्रवृत्तित्वाभाववत्तिगगनादौ व्यत्वस्य सत्त्वेन निरूक्तावच्छेदक
शून्यत्वस्य सत्त्वादिति । तदसत् । यतः तथाविधयावद्धर्मानधिकरणमात्रवृत्तित्व-वृत्तित्वस्य तथाविधयावद्धर्मान
धिकरणेतरावृत्तित्वे सति तथाविधयावद्धर्मानधिकरणवृत्तित्वं नार्थः । विशेष्यदलप्रयोजनाभावादपि तु तथा
वृत्तित्वमात्रं तथा चैतत्त्वानिवेशे अतिव्याप्तेरनवकाशः । गगनादौ तथाविधवृत्तित्वाभावाभावाद
ति धर्मघटितं तथाविधावच्छेदकत्वनिर्वचनं निरर्थकमेवेति चेन्न । तथापि गुणकर्मान्यत्वविशिष्टसत्तावान् जा
तेरित्यत्रातिव्याप्तिः तथाविधयावद्धर्मानाश्रयत्वाद् गुणत्वाद्यनधिकरणमात्रवृत्तित्वस्य सत्तारूपतथाविधविशि
ष्टसत्तायामभावाद्विशिष्टनिरूपितवृत्तितायामनतिरिक्तत्वाभावादिति चेन्नैवं । साधनसमानाधिकरणाया
वन्तो धर्मास्तत्प्रत्येकानधिकरणमात्रवृत्तिधर्मानवच्छिन्नाधिकरणतातद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्न
सामानाधिकरण्यस्य प्रकृते विवक्षितत्वात् । तादृशविशिष्टाधिकरणताया अनतिरिक्तत्वेनोक्तानुपपत्त्यभावादिति ।
ननु व्यतिरेकित्वेन धर्मो विशेषणीयस्तत्राह । महानसादावित्याद्यादि । समवायितया समवायेन

तथाचतथाविधयावधयावद्धर्मवैयधिकरण्यंतथाविधयावद्धर्माभाववद्वृत्तित्वंतथाविधयावद्धर्मानधिक
रणवृत्तित्वंवा।अयथाप्रिवाह्रुमान्धूमादित्यादावव्याप्तिः।तथाविधयावदंतःपातिनोवन्ह्यादेःसमवायसंबंधेना
भाववतिसमवायेनतद्वृत्तेरप्रसिद्धाभाववतिमहानसादौवन्हेर्वृत्तित्वेननिरुक्तवैयधिकरण्यस्यतत्रसत्वादितिभा
वः।आद्यमपिलक्षणमाशंक्यते।अथेति।अनौपाधिकत्वंउपाध्यभाववत्वंसंबंधःसामानाधिकरण्यंतथाचउ
पाध्यभावविशिष्टसाध्यसामानाधिकरण्यंव्याप्तिरितिवाक्यार्थः।वन्हिमान्धूमादित्यादौउपाध्यभावेनलक्ष
णसमन्वयः।धूमवान्वन्हेरित्यादौआर्द्रेंधनाधिरूपोपाधिसत्वान्नातिव्याप्तिः।उपाधिश्चनिर्वचनंविनातद्घटित
लक्षणासंभवात्निर्वक्ति।उपाधिश्चेत्यादि।ननुव्यापकत्वंव्याप्तिनिरूपकत्वंएतत्स्पष्टव्याप्तिसमपिअनौपा
धिकत्वांतरविशिष्टसामानाधिकरण्यपरत्वं।एवंतत्रप्रविष्टव्याप्तिरसमपी-स्पनवस्थाप्रसंगइत्यत्रतत्त्वं निर्वक्ति।
व्यापकत्वंचेत्यादि।तथाचसाध्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकत्वेसतिसाधनाधिकरणवृत्तिभा
वप्रतियोगितावच्छेदकत्वंयत्तदवच्छिन्नप्रतियोगिताकाभाववत्वेसतिसाध्यसामानाधिकरण्यंव्याप्तिरितिल
क्षणपर्यवसन्नं।अत्राभावयोरेकसंबंधावच्छिन्नत्वंसंबंधिवक्षणीयंअन्यथाभिन्नसंबंधप्रमादायानुपपत्तिरिति
भावः।नन्वत्रअयमनत्रव्याप्तिर्वृत्तिपावद्धर्मवान्प्रमेयत्वादित्यत्राव्याप्तिः।तत्रसाध्यसमानाधिक

रूपायावद्धर्माणां साध्यतया निरुक्तोपाधेरभावात्। साध्यं च नोपाधिलक्षणे साध्यभिन्नत्वस्य निवेशादित्य
त आह। व्यभिचारश्चेत्यादि। तथा च तथाविधप्रवादस्य निर्युक्तिकत्वमुपाधिलक्षणे साध्यभिन्नत्वनिवेशो सा
ध्यस्योपाधित्वबाधकाभावेन तस्यैव तत्रोपाधितया अतिव्याप्तेरभाव इति भावः। नन्वत्र प्रतियोगिसत्तदभा
वव्याप्यत्वरूपविरोधित्वं अत्यन्ताभावस्यापि अनौपाधिकत्वान्तरविशिष्टसामानाधिकरण्यरूपस्य न वस्थाद्युपरि
ऽत्यत आह। प्रतियोगित्वमित्यादि। सहानवस्थाननियमलक्षणात्तदभावव्याप्यत्वरूपविरोधित्वं प्रतियोगि
त्वमित्यन्वयः। गोत्वाश्वत्वयोरपि तथात्वाभावात् गोत्वाश्वत्वयोः परस्परं प्रतियोगित्वरूपे गोत्वेपि अश्वत्वप्र
तियोगित्वापत्तिरिति भावः। ४ वाभावाच्च। गोत्वाश्वयोरन्यतरस्य तदन्यतरप्रतियोगित्वाभावादित्यर्थः। तथा च
तदभावव्याप्यस्य तत्प्रतियोगित्वे। ५ दूषणान्तरमाह। अन्योन्याभावेत्यादि। असत्त्वा निरुक्तप्रतियोगित्वस्या
सत्त्वात्। तदवच्छिन्नत्वे घटान्योन्याभावस्यापि घटाभावत्वादिति शेषः। तथा चान्योन्याभावप्रतियोगित्वस्याव्या
प्तिरिति भावः। न च तत्संबन्धावच्छिन्नप्रतियोगिताकतदभावाभावस्य तत्तत्संबन्धावच्छिन्नव्याप्यत्वेन तत्संबं
धावच्छिन्नतदभावप्रतियोगित्वमिति प्रतियोगितावच्छेदकसंबन्धनियन्त्रितप्रतियोगित्वलक्षणाकरणान्नानु
पपत्तिरिति वाच्यं। संयोगसंबन्धावच्छिन्नप्रतियोगिताकसत्ताभावप्रतियोगित्वापत्त्या अव्याप्तेः। संयो

गसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावाप्रसिद्धेः। प्रतियोगिन्यनुयोगित्वाभावात्। प्रतियोगिनी अनुयोगि
नां यस्य इति बहुव्रीहिसमासात्। प्रतियोगित्वमर्थः। प्रतियोगिप्रभाविषयः स्वरूपसंबंधविशेषः। अभावविर
रहः स्वयं चेति। तदभाववत्वं तदभावप्रतियोगित्वमित्यर्थः। अत्र वाच्योऽनाश्रयोर्यापन्नस्योर्लक्षणस्यान्यो
न्याभावप्रतियोगिन्यव्याप्तेः। अन्योन्याभावस्य प्रतियोगितावच्छेदकरूपत्वेन प्रतियोगिनि तदभाववत्वात्
संयोगसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावप्रतियोगिन्याः सत्ताया अव्याप्तेश्च। तस्य केवलान्वयित्वात् त
दभावाप्रसिद्धेः। एवं तदभावभाववत्त्वमित्यस्य तदभावप्रतियोगिताभाववत्त्वमित्यर्थः। तथा चैतत्प्रविष्टप्र
तियोगित्वमभिमतम् इति तदा अननुगमः इति संबंधविशेषघटनम्। एवं चाजन्यत्वकृत्वा स्वरूपसंबंधविशेष
एव प्रतियोगित्वमस्तु किं उपदर्शितरीत्या तन्निर्वचनेनेति आचार्यनिरुक्तलक्षणं दूषयति। यत्किंचिदि
त्यादि। तथापि घटत्वादौ तत्र सत्तासिध्यसिद्धिभ्यां नियमेन दुष्टत्वम्। प्रकृतलक्षणे अभावप्रति
योगित्वेन निवेशयितुमशक्यः। प्रकृतसाध्यव्यापकत्वे सति प्रकृतसाधनाव्यापकस्याप्रसिद्धेरिति
तदभावासाधारणप्रसिद्धेश्चालीकाभावात्। तदुपगमने तदप्रसिद्ध्या प्रकृतलक्षणे इत्यसंभवापत्तेरि
ति भावः। शंकते। यावदित्यादि निषिध्यते प्रकृतलक्षणे भावप्रतियोगित्वेन निवेश्यते अत्राभावस्य

व्याप

सर्वत्र सपक्षवृत्तितायाम् अन्वयः। तथा च साध्यव्यापके यावति साधनाव्यापकत्वाभाववत्त्वं। साधनव्यापके या
वति साध्यव्यापकाभाववत्त्वं च प्रकृते अनौपाधिकत्वं वाच्यमिति भावः। व्यधिकरणासाध्यचिद्धेतुनिष्ठसा
ध्यसामानाधिकरण्यानधिकरणानधिकरणवृत्तित्वं तत्। तथा च वह्निमान् धूमादित्यादौ व्याप्तिप्रमेयत्वादि
निष्ठं तथापि धाभाववतिनिष्ठसाध्यसामानाधिकरण्यस्य धूमादौ अभावादिति भावः। वैयधिकरण्येपमुद्र
तुमाशंक्यते। यावदित्यादिपदं। साध्यस्य यत्तत्साधनसामानाधिकरण्यसाध्यव्यापकयावद्व्यापकत्वं
प्रकृते अनौपाधिकत्वं वाच्यं। अतो न हेतुनिष्ठसाध्यसामानाधिकरण्यवैयधिकरण्याप्राप्तिरिति भावः। सो
पाधेरपि सोऽव्यभिचारितोऽत एव तथा वक्ता निरुक्तानौपाधिकत्वस्य सत्त्वात् तथा च धूमवान् वह्नेरित्यादौ व्यभिचार
प्रसक्तिव्याप्तिरिति भावः। नाम्नो उपपादयति। तत्पादानित्यादि। प्रकारान्तरेण अनौपाधिकत्वं आशंक्य निषेधति
नापीत्यादि। साध्यं यावत्। अव्यभिचारितावत्त्वं नवतां अव्यभिचारित्वं नौपाधिकत्वं अभिप्रायः। अव्यभिचा
रित्वं अनन्तरं तदभावाद्युक्तवदत्तिसंबोध्यं। तर्हि लाघवात् साध्याव्यभिचारित्वमेवानौपाधिकत्वमस्तु इत्याश
येनाह। साध्याव्यभिचारित्वस्यैवेति। लाघवेनेतिशेषः। गमकत्वसंभवादिति। अनुमितिप्रयोजनकसं
भवादि। तथा च लाघवात् साध्याभाववदवृत्तित्वरूपाव्यभिचारत्वमेवानौपाधिकत्वमस्त्विति भावः। अ

ष्टापत्तेः। दूषणमाह। नन्वेति। साध्याभाववदवृत्तित्वस्याव्यभिचारित्वमित्यर्थः। दूषयति। केवलान्वयि
न्यव्याप्तेरिति शेषः। नन्वेवं सति गुरूत्तरोपदर्शितमेवानौपाधिकत्वमस्त्वित्याशङ्क्य। तथापि केवलान्वयिन्यव्या
प्तेः। यदभाववदवृत्तित्वं प्रमेयत्वादिकं तस्य तत्राप्रसिद्धेरिति भावः। लीलावतीकारोक्तलक्षणमनूद्य निषे
ने धति। नापीति। कार्त्स्न्येनेति विशेषणात् तृतीया। तस्य साध्यस्य कार्त्स्न्यविशिष्टेनेत्यर्थः। कार्त्स्न्यं यावत्त्वं। संबंधः सा
मानाधिकरण्यं। तथा च यावता सह सामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः। अत्र यावत्त्वं साधने वा
साध्ये वा साधनाश्रये वा साधनसमानाधिकरणे वा विशेषणमित्यत्राद्ये यावता साधनेन सह साध्य
सामानाधिकरण्यं व्याप्तिरित्यर्थे दूषणमाह। एकेत्यादि। एकव्यक्तिके हेतौ तदभावादनेकत्वरूपयावत्त्वाभा
भावात् तथा च एकव्यक्तिके हेतावव्याप्तिरिति भावः। द्वितीये हेतौ यावता साध्येन सामानाधिकरण्यं व्याप्ति
रित्यर्थे दूषणमाह। अत एवेति। एकव्यक्तिसाध्यकसकलसाध्याप्रसिद्ध्याऽव्याप्तेरेवेत्यर्थः। कार्त्स्न्येन या
वत्त्वं संबंधः सामानाधिकरण्यं। विषमव्याप्तेः इति। वह्निमान् धूमादित्यर्थः। तदभावात्। कुत्रापि धूम
सकलवह्निसमानाधिकरण्याभावात्। तथा च तत्राव्याप्तिरिति भावः। इदमुपलक्षणं। समव्याप्तावपि संख्या
वान् परिमाणादित्यादौ कुत्रापि परिमाणे सकलसंख्यासामानाधिकरण्याव्याप्तिरिति भावः।

हेतुमेपल्लक्षणा । सामान्यमपीति संख्यावान् परिमाणमादित्यादेः क्वापि पक्षत्वाभावे इत्यर्थः प्रकारान्तरदूषणमाह ।
नचेत्यादि । आश्रितत्वसंबन्धेन संबन्धः सामानाधिकरण्यं । आश्रितत्वाभावात् । वृत्तित्वाभावात् । तथाच वह्नि
मान् धूमादित्यादौ अव्याप्तिरिति भावः । चतुर्थे अध्याहारादिना साधनसमानाधिकरणयावद्धर्मसमानाधि
करणो साध्यसमानाधिकरण्यं व्याप्तिरर्थः । प्रकारान्तरदूषणमाह । नापीत्यादिना । यावन्तो धर्मा इति । साधनसमा
नाधिकरणो यावद्धर्म इत्यर्थः । यावद्धर्माधिकरणाधिकरणत्वं । साधनसमानाधिकरणयावद्धर्माधिकरण
वृत्तित्वं । टीकाकारोक्तलक्षणमात्राव्यभिचारीति । नापीति । संबन्धसमानाधिकरण्यं तथाच स्वाभाविकं र्थ
तथाच साध्यसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोऽर्थः । अत्र स्वाभाविकपदार्थविकल्पं दूषयति ।
स्वभावजन्यत्वे इत्यादिना । स्वभावजन्यत्वे हेतुः स्वरूपजन्यत्वेन दाश्रितत्वादेः हेतुः स्वरूपरहितत्वादेः स्वभावावि
कल्पे इति शेषः । आदिपदग्राह्यं हेतुरूपानिरुक्तानारोपितत्वं । अव्याप्यत्वात् व्याप्तेरिति । अव्याप्तिसहितेति अव्याप्ति
रहितमध्यमपदलोपिसमासात् । द्रव्यं पृथिवीत्वादित्यादौ अव्याप्तिः । द्रव्यं सत्त्वादित्यादौ अतिव्याप्तिश्चेत्यर्थः । अत्र
यथासंख्यं दूषणद्वयमनुगन्तव्यं । लक्षणान्तरं दूषयति । नापीति । अविनाभाव इति । विना साध्येन विना सा
ध्याभाववति भावो वृत्तिर्यस्य तद्भिन्नत्वमित्यर्थः । व्याप्य इति शेषः । तथाच साध्याभाववद्वृत्तिभिन्नत्वं व्याप्यत्वमि

त्पर्यवसितोऽर्थः। असंतान्यो न्याभावभेदं नच भेदान्न पूर्वेति साध्याभाववद्वृत्तित्वासिद्धेनेनपौनरुक्त्यं। व
न्हलान्वयिसाध्यके। अभावात्। साध्याभावस्याभावस्यैव। साध्ये अभावप्रतियोगित्वस्याभावादितियाव
दतो नासिद्धप्रसिद्धिव्याघातः। तथाचेदं वाच्यं ज्ञेयत्वादित्यादौ साध्याभावाप्रसिद्ध्याऽव्याप्तिरिति भावः। लक्ष
णांतरमाशंकते। अथेति। संबंधमात्रं। साध्यसमानाधिकरण्यं। मात्रपदेनात्र व्यभिचारांशव्यवच्छेदः।
ननु द्रव्यं सत्त्वादित्यादौ सत्तायां द्रव्यत्वव्याप्यत्वापत्तिरित्यत आह। व्यभिचारसंबंधस्यापीति। सत्ता
दिनिष्ठद्रव्यत्वादिसामानाधिकरण्यस्यापीत्यर्थः। केनापि सह व्याप्तिस्यात्। किंचिद्रूपावच्छिन्नद्रव्यत्वनिरू
पितव्याप्तिस्यात् तथाच सत्ताया अपि जातित्वावच्छिन्नद्रव्यनिष्ठव्यापकतानिरूपितव्याप्यत्वसत्त्वेन सत्ताया
द्रव्यत्वव्याप्यत्वं च निष्प्रत्यूहमेवेति भावः। धूमादिव्याप्तिस्त्विति। वह्नित्वावच्छिन्नादिनिरूपितधूमत्वावच्छिन्नादिनि
ष्ठव्याप्तिस्त्वित्यर्थः। विशिष्यैवेति। धूमत्वावच्छिन्ननिरूपितसामानाधिकरण्यं। धूमत्वावच्छिन्ननिष्ठव
ह्नित्वावच्छिन्ननिरूपितव्याप्तिरित्येवंरीत्यैवेत्यर्थः। एवकारेण तत्तद्धर्मावच्छिन्नसामानाधिकरण्यरूप
सामान्यलक्षणव्यवच्छेदः। अन्यथा सत्तायां द्रव्यत्वत्वावच्छिन्नसामानाधिकरण्यस्य व्याप्तित्वापत्तेरि
ति भावः। इदं व्याप्तिलक्षणं वा अनुमितिजनकतावच्छेदकं वा व्याप्तिपदप्रवृत्तिनिमित्तं वा। तत्राद्ये दूषणा

माह। लिंगेत्यादि। लिंगपरामर्शविषयव्याप्तिरूपनिरूपणप्रस्तावे लिंगविशेष्यकव्याप्तिप्रकारकज्ञानविषयी
भूतजिज्ञासितव्याप्तिस्वरूपनिरूपणीयत्वलक्षणाभिधानस्य व्याप्तिलक्षणाभिधानस्य अर्थात्तस्या निराका
ङ्क्षितत्वेनाभिधानसंगतिः। तथा चानाकांक्षिताभिधाने नियहस्थानापत्तिरिति भावः। द्वितीयं दूषणमाह। नचे
ति। नचेत्यर्थः। संबंधमात्रसामानाधिकरण्यमात्रं। तथा अनुमितिजनकतावच्छेदकं ज्ञानबोधादिति। व्यभिचार
ज्ञानदशायां साध्यसामानाधिकरण्यज्ञानादित्यर्थः। तथा च केवलसाध्यसामानाधिकरण्यज्ञानस्यानु
मितिहेतुत्वे व्यभिचारज्ञानदशायां साध्यसामानाधिकरण्यज्ञानादनुमित्यापत्तिरिति भावः। न च व्यभि
चारिज्ञानाभावोप्यनुमितिहेतुर्वाच्यः। तथा सति व्यभिचारव्याप्यवत्ताज्ञानादिकाले पक्षे साध्यसमाना
धिकरण्यज्ञानमात्रादनुमित्यापत्तेः। न च तदभावोपि तत्र हेतुरिति वाच्यं। तथा सति गौरवापत्तेः। लाघवात्तत्ता
दृशव्यभिचारितत्वविशिष्टसाध्यसामानाधिकरण्यज्ञानस्यैव तत्र हेतुत्वौचित्यादित्यादिकं तु तरमन्यत्रोक्तं
तृतीयं दूषणमाह। नापीत्यादि। व्याप्तिपदप्रवृत्तिनिमित्ततादात्म्येन व्याप्तिपदाप्रयोगात्। व्याप्तिपदप्रयो
गविषयत्वाभावात्। तथा च व्याप्तिपदप्रयोगविषयत्वाभावात्तस्य न व्याप्तिपदप्रवृत्तिनिमित्तत्वमि
त्यर्थ इति भावः। केषांचिन्मतमाह। केवलान्वयिनीति। केवलान्वयिसाध्यकहेतावित्यर्थः। केवला

न्वयिसंबंधः केवलान्वयिसाध्यसामानाधिकरण्यं अत्र व्याप्तिस्तस्यानुगमः व्यतिरेकिणी व्याप्तिरेकिसाध्य
कहेतोः एतयोः उपदर्शितेव्याप्ती अनुमितिविशेषजनकत्वं अनुमितिविशेषनिष्ठकार्यतानिरूपितकारणतायां
विषयितासंबंधेनावच्छेदकता केवलान्वयिसाध्यकानुमितिं प्रति केवलान्वयिसाध्यसामानाधिकरण्य
रूपव्याप्तिविशिष्टव्याप्तिहेतुमत्ताज्ञानं कारणं व्यतिरेकिसाध्यकानुमितिं प्रति साध्यवदन्यावृत्तित्वरूपव्या
प्तिविशिष्टहेतुमत्ताज्ञानं कारणमित्यभिप्रायः । नन्वेवं सति अनुमितित्वस्य कार्यतावच्छेदकत्वं भज्येतेत्यत आ
ह । अनुमितिमात्रे इति । अत्र मात्रपदं कृत्स्नार्थकं तथा चानुमितित्वावच्छिन्नेऽर्थः । पक्षधर्मतैव प्रयो
जिका पक्षवृत्तित्वप्रकारकत्वेन विषयितासंबंधेन ज्ञाननिष्ठजनकतावच्छेदिका । अनुमितित्वावच्छिन्नं प्रति प
क्षवृत्तित्वविषयकज्ञानत्वेनैव हेतुतामित्यावत् । अत्र व्याप्तिनाया निवेशो प्रयोजनाभावात् । अनुमि
तित्वावच्छिन्नं प्रति पक्षज्ञानत्वेनैव हेतुत्वे सति निष्कर्षो बोध्यः । पक्षत्वं चात्र अनुमितिविशेष्यत्वं । अ
संगत्यनिव्याप्तिविशिष्टहेतुमत्ताज्ञानाभाववदशायां पर्वतादिज्ञानादप्यनुमित्यापत्तिरित्यर्थः । विशेषसा
मग्र्या इत्यादि । तथा च पर्वतादिज्ञानेन अनुमितिरूपफलं जननीयं केवलान्वयिसाध्यसामानाधि
केवलेरण्यविशिष्टहेतुमत्ताज्ञानं साध्यवदन्यावृत्तित्वव्याप्तिविशिष्टहेतुमत्ताज्ञानयोरन्यतरस्य सह

कारित्वयानोक्तापत्तिरिति भावः॥तथात्वात्॥सकलवह्निमादनुनस्यात्॥तथाचवह्निमान् धूमादित्यादौ
चक्रकापत्तिर्दुरुद्धरैवसकलवह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदवत्त्वतिपर्वतःदौ धूमस्यव्र